# Sri Ganesha Dvadasha Stotram

# શ્રીગણેશદ્વાદશસ્તોત્રમ્

## Document Information

Text title : gaNeshadvAdashastotram 2

File name : gaNeshadvAdashastotramPS.itx

Category : ganesha, puShpAshrIvatsan, dvAdasha, stotra

Location : doc_ganesha

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Translated by : Pushpa Srivatsan

Description-comments : On the occasion of receiving 2021 diary with Ganesha picture

Latest update : January 13, 2021

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

September 26, 2021

*sanskritdocuments.org*

# શ્રીગણેશદ્વાદશસ્તોત્રમ્

ૐ

શ્રીરામજયમ્

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

શ્રીગણપતયે નમો નમઃ ।

અથ શ્રીગણેશદ્વાદશસ્તોત્રમ્ ।

ગિરિરાજસુતાપુત્રં પ્રણવાકારદૈવતમ્ ।
સ્વરરાગસુસઙ્ગીતં ગણનાથં ભજામ્યહમ્ ॥ ૧॥

સર્વારમ્ભનમસ્કારં સર્વવિઘ્નપ્રણાશનમ્ ।
સર્વવિદ્યાદિમૂલં તં ગણનાથં ભજામ્યહમ્ ॥ ૨॥

ઋષભારૂઢસત્સૂનું ઋષિસજ્જનવલ્લભમ્ ।
ઋષિશ્રેષ્ઠગુરુસ્તોત્રં ગણનાથં ભજામ્યહમ્ ॥ ૩॥

ગજાનનં ગરિષ્ઠં ગં ગંમન્ત્રાક્ષરપૂજિતમ્ ।
ગાઙ્ગેયપૂર્વજં ગઙ્ગં ગણનાથં ભજામ્યહમ્ ॥ ૪॥ (૧)

મહાગણપતિં પૂજ્યં મઙ્ગલ્યવાક્પ્રવાહિણમ્ ।
મહદ્બ્રહ્માણ્ડકુક્ષિં તં ગણનાથં ભજામ્યહમ્ ॥ ૫॥

પઞ્ચાનનપ્રમોદં તં પાણિસ્થજ્ઞાનમોદકમ્ ।
પશુપાશવિમોક્તારં ગણનાથં ભજામ્યહમ્ ॥ ૬॥

ધનજ્ઞાનપ્રદાતારં ધરકેદારસુસ્થલમ્ ।
ધન્યૈકદન્તદૈવત્યં ગણનાથં ભજામ્યહમ્ ॥ ૭॥

નિષ્ઠાપૂજિતનિત્યં તં નિત્યપૂજનસૌભગમ્ ।
નિત્યોંકારસ્વતુણ્ડં નં ગણનાથં ભજામ્યહમ્ ॥ ૮॥

સપ્તસ્વરશુભાનૃત્યં સર્વસિદ્ધિવિનાયકમ્ ।

સર્વમઙ્ગલધાતારં ગણનાથં ભજામ્યહમ્ ॥ ૯॥

ત્યાગરાજગુરુસ્વામિસત્કીર્તનસુસેવિતમ્ ।
શિષ્યાપુષ્પાસ્તુતિસ્તોત્રરાગભાવં સુમઙ્ગલમ્ ॥ ૧૦॥

મઙ્ગલં ગણનાથાય હેરંબાય સુમઙ્ગલમ્ ।
મઙ્ગલં વિઘ્નવારાય શુભોત્તુઙ્ગાય મઙ્ગલમ્ ॥ ૧૧॥

ગણેશસ્ફુરિતસ્તોત્રં વિઘ્નઘ્નં જ્ઞાનદં શુભમ્ ।
ગણનાથકૃપાપૂર્ણં પઠિતવ્યં દિને દિને ॥ ૧૨॥

ૐ

શુભમસ્તુ

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિશિષ્યયા ભક્તયા પુષ્પયા
શ્રીગણેશસ્ફુરિતસ્તોત્રં ગુરુસ્વામિસન્નિધૌ સમર્પિતમ્ ।

ૐ

Footnote
(૧) ગં ગં = entered into the ગં mantra

Composed and translated by Pushpa Srivatsan (Copyright)
Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Sri Ganesha Dvadasha Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on September 26, 2021

Please send corrections to *sanskrit@cheerful.com*